S3 p6

लिङ्गविशेषेणापि नियन्त्रितं पक्षत्वमिति ग्रन्थस्याशयं वर्णयत ।

तल्लिङ्गकानुमिति जनकपक्षता शरीरे तल्लिङ्गकानुमिति इच्छायाः प्रवेशे लिङ्गभेदेन पक्षताभेदप्रसङ्गः इत्याक्षेपः। तत्र समाधानं तु लिङ्गवशेषेणापि नियन्त्रितं पक्षत्वम् इति । तथा च लिङ्गभेदेनापि पक्षत्वम् भिन्नमेव । अत्र अपि शब्दः साध्यादिभेदसमुच्चायकः । तथा च यथा साध्यापक्षादिभेदेन पक्षता भिन्ना तथा लिङ्गभेदेन पक्षता भिन्ना इत्यर्थः।

,ननु लिङ्गभेदेन पक्षताभेदाङ्गीकारे यत्र पर्वतः वह्निव्याप्यालेकवान् इति परामर्शःआलोकेन पर्वते वह्निमनुमिनुयाम् इति इच्छा च तत्र पर्वतो वह्निमानित्यनुमितिः जायते । एवं यत्र पर्वतो वहनिव्याप्यधूमवान् इति परामर्शः धूमेन पर्वते वह्निमनुमिनियाम् इति इच्छा च तत्रापि पर्वतो वह्निमान् इत्येवानुमितिर्जायते । तथा च पर्वतो वह्निमनित्यनुमितिं प्रति आलोकलिङ्गकानुमिति-इच्छाविरहविशिष्टसिद्ध्यभावस्यधूमलिङ्गकानुमिति इच्छाविरहविशिष्टसिद्ध्यभवस्य च पक्षतात्वेन , हेतुत्वं व०ाच्यं । तथा च यत्र धूलिङगक इच्छाविरहविशिष्टसिद्ध्यभावात् पर्वतो वह्निमान् इत्यनुमितिर्जायतेतत्र आल ,०ोकलिङगक इच्छाविरहविशिष्टसिद्ध्यभावं विनापि अनुमितेः जायमानतया व्यतिरेकव्यभिचारः।

न चकार्यतावच्छेदकशरीरे तल्लिङगकत्वमपि निवेश्य आलोकलिङ्गकपर्वतोद्देश्यकवह्निविधेयक अनुमितित्वावच्छिन्नं प्रति आलोकलिङ्गक इच्छाविरहविशिष्ट सिद्ध्यभावः कारणम् इति रीत्या कार्यकारणभावकल्पने नोक्तव्यभिचारः इति वाच्यम् । यत्र पर्वतो वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च इत्याकारकसमूहालम्बनपरामर्शः ,पर्वते आलोकेन वह्निमनुमिनियाम् इति आलोकलिङ्गकानुमिति इच्छा च वर्तते,तत्र पर्वतो वह्निमानित्यनुमितिः जायते , या च धूमपरामर्शजन्या इति हेतोः धूमलिङ्गकापि भवति । तत्र धूमलिङ्गक इच्छाविरहविशिष्टसिद्ध्यभावः नास्तीति कारणाभावात् व्यतिरेकव्यभिचारः।

– अत्रोच्यतेधूमलिङगक इच्छाविरहविशिष्टसिद्धिविशिष्टा या अनुमितिः तद्भिन्नानुमितित्वावच्छिन्नं प्रति धूमलिङ्गक इच्छाविरहवविशिष्टसिद्ध्यभावः कारणम्। तादृशसिद्धिविशिष्टत्वञ्च स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व उभयसम्बन्धेन वाच्यम् ।पर्वतो वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च इति समूहालम्बनपरामर्शानन्तरम् आलोकलिङ्गकानुमितीच्छया जायमानायाः पर्वतो वह्निमानित्यनुमितेः तथाविधसिद्धिवैशिष्ट्यत्वमेवास्तीति न तु तादृशसिद्धिविशिष्टान्यत्वम् इति नोक्तव्यभिचारः।

अत्र कार्यतावच्छेदककोटौ इच्छांशे तल्लिङ्गकत्वस्य प्रवेशात् लिङ्गभेदेन पक्षताभेदप्रतिपादकस्य दीधितिग्रन्थस्य नासङ्गतिः ।